possessing judgment, said of persons) विचेकी -किनी -कि (न्), विचेकदृश्वा -श्वा -श्व (न्), बुद्धिमान् -मती -मत् (त्), मतिमान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, धिज्ञः -ज्ञा -ज्ञं, प्राज्ञः -ज्ञा -ज्ञं, मनस्वी -स्विनी -स्वि (न्), विश्वासकारी -रिणी -रि (न्), सनीच्छकारी &c., ज्ञानी -निनी -नि (न्), विज्ञेयज्ञः -ज्ञा -ज्ञं, हिताहितदर्शी &c., सदसद्दर्शी &c., सुपरिच्छेदकः -का -के, उचितज्ञः -ज्ञा -ज्ञं.

JUDICIOUSLY, *adv.* विचेकानुसारेण, सविवेकं, विज्ञवत्, प्राज्ञवत्, नीतिज्ञवत्, सपरिच्छेदं, धिङ्ज्ञानवत्, बुधवत्, युक्तं, यथोचितं, समज्ञसं, सम्यक्, सुष्ठु, सुधिमृश्य, सुविचार्य्य.

JUDICIOUSNESS, *s.* युक्तता, उपयुक्तता, सविवेकत्वं, बुद्धिमत्त्वं, विज्ञता.

JUG, *s.* कुम्भः, मृत्कांस्यं, मृत्कांस्यं, कांस्यं, कंसः -सं, कंशः, मृद्भाण्डं, पुटग्रीवः, कलशः, कलसः, जलपात्रं, उदपात्रं.

To JUGGLE, *v. a.* (Play tricks by sleight of hand) मायां कृ, इन्द्रियमायां कृ, दृष्टिमायां कृ, इन्द्रियमोहं कृ, दृष्टिमोहं कृ, कुहकं कृ, इन्द्रियजालं कृ, इस्तलाघवं कृ, कुमृतिं कृ, दृष्टिबन्धनं कृ.—(Deceive by trick) मुह् (c. 10. मोहयति -यितुं), छल् (c. 10. छलयति -यितुं), वञ्च (c. 10. वञ्चयते -ति -यितुं).

JUGGLE, *s.* माया, मोहः, कुहकः, छलं, कूटता, कूटः, वञ्चनं.

JUGGLER, *s.* मायी *m.* (न्), मायाकारः, मायाजीवी *m.* (न्), मायावी *m.* (न्), कुहककारः, कुहकजीवी *m.*, कुहकः, इन्द्रजालिकः, इन्द्रजालिकः, इन्द्रियमोही *m.* (न्), प्रतिहारः -रकः, प्रातिहारिकः -रकः, कौमृतिकः, योगी *m.* (न्), सम्प्रयोगी *m.*, अभिचारविद् *m.*, शौभिकः, आहितुण्डिकः; 'female juggler,' माया, मायिनी, मायाजीविनी, शाम्बरी.

JUGGLERY, JUGGLING, *s.* (Legerdemain) हस्तलाघवं, हस्तचापल्यं, माया, कुहकः, कुहकवृत्तिः *f.*, इन्द्रजालं, इन्द्रियमोहः, कुमृतिः *f.*, दृष्टिमोहः, दृष्टिबन्धः, अभिचारः, जालं, योगः, सम्प्रयोगः.—(Trickery) कूटता, छलं, वञ्चना.

JUGULAR, *a.* कण्ठस्थः -स्थया -स्थर्यं, कण्ठसम्बन्धी &c., कण्ठस्थः -स्था -स्थं, ग्रीवासम्बन्धीयः -या -यं.

JUICE, *s.* रसः, द्रवः, नियासः, सारः, सुधा, आसवः, नीरं, मज्जा, स्वेदः.—(From the elephant's temples) मदः, दानं, हस्तिमदः, गण्डकुसुमं; 'its issue from the forehead,' मदप्रयोगः.

JUICELESS, *a.* नीरसः -सा -सं, विरसः -सा -सं, अरसः -सा -सं, निरसः -सा -सं, रसहीनः -ना -नं, रसशून्यः -न्या -न्यं, असारः -रा -रं, निस्सारः -रा -रं, सारवर्जितः -ता -तं, शुष्कः -ष्का -ष्कं, पिण्डीरः -रा -रं.

JUICINESS, *s.* सरसता, रसवत्त्वं, रसिकत्वं, रसवाहुल्यं, बहुरसत्वं.

JUICY, *a.* सरसः -सा -सं, रसवान् -वती -वत् (त्), रसी -रसिनी -सि (न्), रसिकः -का -कं, रसाढ्यः -ढ्या -ढ्यं, रस्यः -स्या -स्यं, बहुरसः -सा -सं, सारवान् &c., बहुसारः -रा -रं.

JUJUBE, *s.* (The tree) बदरः -री *f.* -रिः *m.*, बदरिकः, बदरिकः, राजबदरः, कर्कन्धुः *m. f.* -न्धुः, कोलिः -लि *f.*, कुकोलं, सौवीरं, कर्कशी -शिका, कुवदः; 'the fruit,' बदरं.

JULY, *s.* आषाढः -ढकः, आषाढः -ढिकः, उत्तराषाढः, पूर्वाषाढाशः, आषाढाद्यावयं, सप्तममासः.

To JUMBLE, *v. a.* सम्मिश्र् (c. 10. -मिश्रयति -यितुं), सम्मिश्रीकृ, व्यामिश्र्, मिश्र्, सङ्कृ (c. 6. -किरति -करितुं -रीतुं), सङ्करीकृ, सङ्कीर्णीकृ, सङ्कुलीकृ, अस्थव्यस्तीकृ, संविधृ (c. 6. -विधृणोति -धेतुं), विधिधृ.

To JUMBLE, *v. n.* (Be jumbled) सम्मिश्रीभू, सङ्कृ in pass. (-कीर्य्यते), सङ्करीभू, सङ्कुलीभू, सङ्कुलीभू, सम्मिश्रितः -ता -तं भू.

JUMBLE, *s.* सम्मिश्रणं, मिश्रणं, सङ्करः, सङ्कुलं, सङ्कीर्णत्वं, अस्थव्यस्तता, सङ्कुलता, सन्निपातः, संघोषः, व्यतिकरः, सङ्कलनं.

JUMBLED, *p. p.* सम्मिश्रितः -ता -तं, सम्मिश्रः -श्रा -श्रं, सम्मिश्रीकृतः -ता -तं, मिश्रितः -ता -तं, सङ्करीकृतः -ता -तं, सङ्करीणः -णी -णं, सङ्कुलः -ला -लं, अस्थव्यस्तः -स्ता -स्तं, सन्निपातितः -ता -तं, संक्षुभ्यः -भ्या -भं.

JUMNA, *s.* (A river which rises in a mountain called Kalinda, in the Himalaya range, and, after a course of 378 miles, falls into the Ganges below Allahabad; she is daughter of the sun and sister of Yama) यमुना, कालिन्दी, कालिन्दकन्या, कालिन्दनन्दिनी, कालिन्दशैलजाता.—(As daughter of the sun) सूर्य्यजा, सूर्य्यतनया, सूर्य्यपुत्री, देवाकरी.—(As sister of Yama) यमसा *f.* (सृ), यमभगिनी.—(Of a dark blue colour) श्यामा.

To JUMP, *v. a.* प्लु (c. 1. प्लवते, प्रोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), चावल्, स्कन्द् (c. 1. स्कन्दते, स्कन्तुं), क्रम्भ् कृ; 'to jump over,' लङ्घ् (c. 10. लङ्घयति -यितुं), अभिलङ्घ् ; 'to jump over a wall,' प्राकारलङ्घनं कृ; 'jump up,' उल्लु, समुल्लु, उत्पत् (c. 1. -पतति -तितुं), प्रोत्पत्, उत्प्लुप् (c. 1. -सर्पति -सप्तुं); 'jump down,' अवप्लु, अवस्कन्द् ; 'to jump out from,' प्रस्कन्द् ; 'to jump about,' नृत् (c. 4. नृत्यति, नर्त्तितुं); 'having jumped up,' उत्प्लुत्य.

JUMP, *s.* प्रपः, प्रवनं, प्लुतं, उत्प्लवनं, उत्प्लुतं, क्रम्पः -म्पा, वल्गितं, उत्क्षालः, उत्पतनं, उत्सर्पणं, अवस्कन्दः.

JUMPED, *p. p.* प्लुतः -ता -तं, उत्प्लुतः -ता -तं, वल्गितः -ता -तं, उत्पतितः -ता -तं.

JUMPER, *s.* प्रपकः, प्रवनकारी *m.* (न्), क्रम्पकारी *m.*, क्रम्पी *m.* (न्), उत्प्लवकः, उत्पतिता *m.* (तृ); 'going by jumps,' प्रपगः -गाः *m.*

JUMPING, *s.* (Act of jumping) प्रवनं, उत्प्लवनं, उत्पतनं, उत्सर्पणं.

JUMPING, *part.* प्रपमानः -ना -नं, वल्गन् -ल्गनी -ल्गत् (त्), उत्पतिष्णुः -ष्णुः -ष्णु, उत्पतिता -त्री -तृ (तृ).

JUNCATE, *s.* किलाटपिष्टकः, दधिक्षीरादिमयो मोदकः, मिश्राबं.

JUNCOUS, *a.* दूर्वाधिकीयः -यी -यीं, नडकीयः -या -यं.

JUNCTION, *s.* योगः, संयोगः, संयोजनं, समायोगः, सम्प्रयोगः, युक्तिः *f.*, सन्धिः *m.*, सन्धानं, श्लेषः, संश्लेषः, सङ्गः -ङ्गमः -ङ्गतिः *f.* -तं, समागमः, संहतिः *f.*, संघातः, संसक्तिः *f.*, समासक्तिः *f.* संसृष्टिः *f.*, संसर्गः, मेलनं, सम्पर्कः, सन्त्यः, सक्तिः *f.*, आसक्तिः *f.*, प्रसक्तिः *f.*—(Point of union) सन्धिस्थानं.

JUNCTURE, *s.* (Point of time, crisis) लग्नं, सन्धिः *m.*, कालसन्धिः *m.*, सन्धिवेला, समयः, वेला, कालः, प्रसङ्गः, अवकाशः.—(Joint, articulation) सन्धिः *m.*, ग्रन्थिः *m.*—(Seam) सीवनं.

JUNE, *s.* ज्येष्ठः, आषाढः -ढकः, ज्येष्ठः, ज्येष्ठामूलीयः, पूर्वाषाढः, उत्तरज्येष्ठः, ज्येष्ठाषाढकः.

JUNGLE, *s.* जङ्गलं, जाङ्गलं, प्रस्तारः, जङ्गलस्थानं, गुल्मावृतस्थानं.

JUNGLY, *a.* जाङ्गलः -ली -लं, जङ्गली -लिनी -लि (न्), प्रस्तारी &c.

JUNIOR, *a.* अवरः -रा -रं, अवरवयस्कः -स्का -स्कं, अवरवयाः -या: -यः (स्), अवरजः -जा -जं, अवरजातः -ता -तं, अनुजः -जा -जं, अनुजातः -ता -तं, अनुजन्मा -न्मा -न्म (न्), जघन्यजः -न्या -न्यं, यवीयान् -यसी -यः (स्), कनीयान् -यसी -यः (स्), यविष्ठः -ष्ठा -ष्ठं, कनिष्ठः -ष्ठा -ष्ठं.

JUNIPER, *s.* भूनिम्बपराख्यो वृक्षभेदः.

JUNK, *s.* चीनदेशीयो वृहत्कौकाविशेषः, चीननौका.—(Pieces of old cable) जीर्णरज्जुखण्डाः *m. pl.*

JUNKET, *s.* निभृते कृतं परमाश्नभोजनं or उत्तमान्नसम्भोजनं or सहभोजनं, छलेन कृतो महोत्सवः, निभृतोत्सवः.

To JUNKET, *v. n.* निभृतोत्सवं कृ, निभृते or छलेन सहभोजनं कृ or उत्सवं कृ.

JUNTA, JUNTO, *s.* (Council) सभा, समाजः, शिष्टसभा, महासभा.—(Cabal) गोपनीयकर्म्मसु धनार्थं कतिपयजनसंसर्गः, कुसंसर्गः.